# Astikaproktam Shivaradhanaparipurnatanubhavavarnanam

# આસ્તિકપ્રોક્તં શિવારાધનપરિપૂર્ણતાનુભવવર્ણનમ્

## Document Information

Text title : Astikaproktam Shivaradhanaparipurnatanubhavavarnanam

File name : shivArAdhanaparipUrNatAnubhavavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 28 | 23-107 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# આસ્તિકપ્રોક્તં શિવારાધનપરિપૂર્ણતાનુભવવર્ણનમ્

- આસ્તિકવિષ્ણુસંવાદે -

આસ્તિકઃ -

વેદૈર્વદાન્યોત્તમમીશમેકં મત્વા મહાદેવમુપાશ્રિતોઽહમ્ ।
સ એવ મે સર્વવરપ્રદાતા દાતા વરાણાં વરદોત્તમોઽયમ્ ॥ ૮૫॥

યં યં વાઞ્છતિ શામ્ભવઃ પ્રતિદિનં તં તં પ્રયચ્છત્યુમા-
કાન્તઃ સન્તતમન્તકાન્તક ઇતિ ખ્યાતો ય એવ શ્રુતૌ ।
તસ્મિન્ મે વરદોત્તમે સતિ મનો દૈન્યં ન જાનાત્યતઃ
કિં મે દુર્લભમસ્તિ શઙ્કરપદધ્યાનેન તન્મે મનઃ ॥ ૮૬॥

યો દાતાઃજગતાં તવાપિ કમલાકાન્તામરાધીશ્વરો
ગૌરીચારુપયોધરાધરમહાહારાબલીલયા ।
લોકાન્ પાલયતિ સ્વભાવવિભવસ્તદ્વૈભવસ્યા-
વધિર્નાસ્ત્યેવેતિ સ એવ મે વરદ ઇત્યન્યં ન મન્યામહે ॥ ૮૭॥

સ્વપ્ને વા ગિરિજામનોહરપદામ્ભોજાર્ચનાન્મે મનો
નૈવાસીદ્વિરતં ન ચાન્યભઞ્જનાસક્તં પ્રમત્તં ચ ન ।
તેનૈવેપ્સિતસિદ્ધિરિત્યપિ મતિવૃદ્ધિં પ્રયાત્યેવ મે
દૈત્યારાતિરુમાપતિઃ શરણમિત્યન્યં ન મન્યામહે ॥ ૮૮॥

યદ્દૌવારિકદણ્ડમણ્ડલકશાધાતાદિભીતો ભવાનાદાવેવ
ચતુર્મુખોઽપિ સ શચીનાથોઽપિ તં કેવલમ્ ।
યાચે યાચકકલ્પભૂરુહમહં મોહં વિહાયાધુના
મોહધ્વાન્તવિનાશકે સતિ શિવેત્યન્યં ન મન્યામહે ॥ ૮૯॥

અસ્માકં ગિરિજામનોહરહરાપારાદરાત્યાદરે શાન્તે
શાન્તતરં નિરન્તરમુમાકાન્તાનુરક્તે સતિ ।
અન્યસ્માત્ કિમપેક્ષિતં કિમપિ ન ન્યૂનં જગન્મણ્ડલે
પીયૂષાંશુકલાવતંસભજનાદન્યન્ન મન્યામહે ॥ ૯૦॥

સ્મૃત્વા જનાજરાભિઘાતનિહતાઃ શર્વાન્યસંસેવનાત્
શ્રાન્તં મે મન એવ તાવદધુના તેભ્યો નિવૃત્તં તતઃ ।
ભૂયસ્તત્પદસેવનં ન કુરુતે તુચ્છત્વબુદ્ધ્યા ષરં
તાંસ્ત્યક્ત્વા શિવપૂજનં પરમતોઽપ્યન્યં ન મન્યામહે ॥ ૯૧॥

મૃત્યુર્યસ્ય જરાદિજન્મજનિતં દુઃખં ન યસ્યાભવત્
તં મૃત્યુઞ્જયમેકમેવ શરણં પ્રાપ્તાઃ સદા સાદરમ્ ।
તસ્મિન્નેવ વદાન્યનાયકવરે ગૌરીવિહારે ષરે
ઇત્થં ક્રીડતિ તેન સિદ્ધિરભિતોઽપ્યન્યં ન મન્યામહે ॥ ૯૨॥

યાવદ્ ભ્રાન્તિરભૂત્ પુરાઽતિવિષમા તાવત્પરારાધને-
પ્યાસક્તં ત્વયિ જન્મમૃત્યુવશગે જ્ઞાતે નિવૃત્તં મનઃ ।
કો વા જન્મજરાવિહીન ઇતિ તચ્ચિત્તં વિચાર્યાધુના
શ્રીમૃત્યુઞ્જયચિન્તને વિરતમિત્યન્યં ન મન્યામહે ॥ ૯૩॥

કો વા રત્નવિશેષનિર્મિતલસત્પાત્રસ્ય દુગ્ધં શિવે
દત્તં શર્કરયા સમેતમનઘેનાજ્યેન યુક્તં પરમ્ ।
ત્યક્ત્વા ક્ષારજલં પિબત્યનુદિનં તસ્માચ્છિવાન્યઃ સુરો
નોપાસ્યોઽપિ ન તેન વાક્ફલમતોઽપ્યન્યં ન મન્યામહે ॥ ૯૪॥

કો વા મેરુશરાપનં ત્રિનયનં ગૌરીવિહારાદર-
વ્યાખ્યાનપ્રવણપ્રસાધનધનં કૈલાસસિંહાસનમ્ ।
ત્યક્ત્વાઽન્યામરસેવનાય યતતે ભીતો યથા ભીતિતઃ
પ્રાપ્નોત્યેવ વિમોહિતઃ પ્રકૃતિતોઽપ્યન્યં ન મન્યામહે ॥ ૯૫॥

કઃ પ્રાપ્યાપિ સુધાબ્ધિતીરમસકૃદ્ધીરઃ પિપાસાતુરઃ
તત્ક્ષીરં પરિહાય દુર્મતિયુતઃ ક્ષીરામ્બુરાશિં વ્રજેત્ ।
તસ્માદ્દેવશિખામણિં સુરમણિં શ્રીશૂલપાણિં મનઃ
ત્યક્ત્વાન્યં ન ભજત્યપિ સ્વયમતોઽપ્યન્યં ન મન્યામહે ॥ ૯૬॥

કિં કષ્ટાન્યપિ વિસ્મૃતાનિ ભવતા વિશ્વેશ્વરારાધન-
ત્યાગાત્ સાયમિમં ગતૈવ કમલા સિન્ધું તતઃ પીડયા ।
તન્નિર્મન્થનકાલકૂટકલિતજ્વાલાકુલઃ કૃષ્ણતાં
પ્રાપ્તોઽસિ સ્મર તત્પરં સ્મૃતમતોઽપ્યન્યં ન મન્યામહે ॥ ૯૭॥

ત્વં ઘોરે વિપિને વરાહવપુષા લક્ષ્મીવિહીનસ્તદા

તદ્વન્યાશનજીવનઃ શિવપદામ્ભોજાર્ચનાનાદરાત્ ।
તત્ કિં વિસ્મૃતમેવ તત્સ્મર પુનઃ તેનાપિ લજ્જા ન કિં
તે તાવદ્વદ તેન તાવદધુના ત્વન્યં ન મન્યામહે ॥ ૯૮॥

સ્વત્વં વસ્તુષુ ભૂતલેઽપિ વિદિતં વિશ્વેશ્વરસ્યેત્યતઃ
સર્વે તસ્ય સ એવ તાવદસકૃદ્ દાતા વદાન્યોત્તમઃ ।
તસ્માદેવ સમસ્તવસ્તુનિચયપ્રાપ્તિસ્તદન્યસ્ય કિં
સ્વત્વં વસ્તુષુ કેષ્વપીત્યપિ મિતેરન્યં ન મન્યામહે ॥ ૯૯॥

ભક્તાભીપ્સિતવસ્તુજાતમસકૃદ્દત્વા પુનર્વાઞ્છિતં
ભક્તસ્યાસ્તિ કિમિત્યનક્ષણમુમાકાન્તો વિચાર્યાદરાત ।
દાતૃત્વવ્યસનેન દાતુમભિતો વાઞ્છત્યપૂર્વં ફલં
લિઙ્ગારાધનતત્પરાદ્ય સતતોપ્યન્યં ન મન્યામહે ॥ ૧૦૦॥

વાઞ્છા યત્ર ન સર્વથા ન વિદિતં નાપિ શ્રુતં સર્વથા
તદ્દાતું શિવપૂજકાય યતતે મૃત્યુઞ્જયઃ સર્વથા ।
તં દેવોત્તમમપ્રયાસફલદં ત્યક્ત્વા તદન્યં મનો
ગન્તું વાઞ્છતિ તુછમિત્યપિ કદાપ્યન્યં ન મન્યામહે ॥ ૧૦૧॥

માતેવાશુ શરીરપોષણરતો લિઙ્ગાર્ચકાનાં સદા
વિશ્વેશઃ સ પિતા પિતેવ વિહિતે ભક્તિં નિયુઙ્ક્તે પુનઃ ।
સ્નેહામ્ભોનિધિમાલયા પરિવૃતં ભક્તં કરોત્યેવ તં
ત્યક્ત્વા તાવદુમાસહાયમધુના ત્વન્યં ન મન્યામહે ॥ ૧૦૨॥

અસ્મત્પૂર્વજપૂર્વજાર્જિતમહાપુણ્યામ્બુરાશેઃ ફલં
સંવૃત્તં ફલમિત્યવૈમિ બહુધા યસ્માદુમાવલ્લભઃ ।
અસ્માકં ફલદૈવતં પરહિતં કર્તું સમર્થઃ સદા
તસ્માદેવ હિતાર્થલાભકથનાદન્યં ન મન્યામહે ॥ ૧૦૩॥

ધન્યાનાં શિવ એવ દૈવતમિતિ જ્ઞાતં શિવપ્રાર્થનં
ધન્યા એવ પરં વિહાય સકલં સંસારરૂપં ફલમ્ ।
નિત્યં નિર્મલચેતસોઽપ્યવિકલં કુર્વન્ત્યુદારાઃ ફલં
હારા એવ હરાત્પરં પરતરં ત્વન્યં ન મન્યામહે ॥ ૧૦૪॥

સમ્પ્રાપ્યાપિ શિવાર્ચનેન સકલં સર્વઃ શિવારાધનો-
પાયઃ પ્રાપ્ત ઇતિ પ્રભૂતવિભવાઃ કુર્વન્તિ લિઙ્ગાર્ચનમ્ ।
તસ્માદપ્યમિતં ફલં પુનરુમાકાન્તાદવાપ્યં તતઃ

શાન્તા એવ શિવં પ્રયાન્તિ તમતોપ્યન્ચં ન મન્યામહે ॥ ૧૦૫॥

યદ્બિલ્વદલમપ્યુમાપતિરતિપ્રીત્યા ગૃહીત્વા નવં
જીર્ણં વા ત્રુટિતં ચ નીરસમપિ શ્રેયસ્કરં કેવલમ્ ।
મત્વા સર્વધરાધિનાથવિનતં દીનં કરોત્યાદરાત્
અન્તે મુક્તિમપિ પ્રયચ્છતિ તતોપ્યન્ચં ન મન્યામહે ॥ ૧૦૬॥

શ્રીકણ્ઠાદ્રિરિરાજરાજતનયામેરુસ્ફુરચ્છીકરાત્
હારશ્રીપરિહારદક્ષવિલસદ્વક્ષોજવક્ષઃસ્થલાત્ ।
ઇન્દ્રાદિપ્રતિપક્ષદક્ષદલનાત્ ભાલાનલાક્ષાત્ પરં
સ્વપ્ને વા મરણેડપિ વા સ્વકરણૈરન્ચં ન મન્યામહે ॥ ૧૦૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે આસ્તિકપ્રોક્તં શિવારાધનપરિપૂર્ણતાનુભવવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૨૮। ૨૩-૧૦૭ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 28. 23-107 ..

Proofread by Ruma Dewan

---

*Astikaproktam Shivaradhanaparipurnatanubhavavarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*